श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

विल्लूर् नडादूर् श्री श्रीनिधेः कृतिषु

# ॥ प्रासश्रीशतकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ प्रासश्रीशतकम् ॥

कविताजितकल्लोलिकन्यकाकान्तवक्षसे।
करुणादिगुणाढ्याय कमलानिधये नमः॥

अङ्गनाऽनङ्गजननी रङ्गनाथस्य भामिनी।
अङ्गलावण्यसन्दृश्या मङ्गलानि करोतु वः॥ 1 ॥

कल्याणकृतयाऽद्यैतु वल्ल्या सौरभयुक्तया।
कल्या सर्वार्थदानेषु कल्यागतमलापहा॥ 2 ॥

अञ्जनाभविशालाक्षी कञ्जनाभस्य कामिनी।
खञ्जनाभविशालाक्षी स्वञ्जनं पातु मां सदा॥ 3 ॥

मानेन हीनविभवा माऽनेन विनुताऽवतु।
दानेन दृश्यविभवा दानेन च तथांहसाम्॥ 4 ॥

कन्या कलशपाथोधेः धन्या पत्या धृतोरसि।
अन्याभिरखिलस्त्रीभिः हन्यादंहस्समीडिता॥ 5 ॥

वन्दनानि मदीयानि स्यन्दनायितपक्षिणः।
मन्दहासमनोज्ञायाः चन्दनोरस्स्थितात्मनः॥ 6 ॥

पञ्चायुधस्य जननी पञ्चायुधमनःप्रिया।
पञ्चाननासनासीना पञ्चासूनपि पातु नः॥ 7 ॥

अञ्चिताङ्घ्रि विरञ्चाद्यैः सञ्चिताश्रितसम्पदम्।
वञ्चिताघगणं चित्ते किञ्चित्कुर्वे सदा मुदा॥ 8 ॥

नायकेऽपि च पद्मेऽपि सायके तनयस्य या।
गायकेऽपि च संलग्ना नायकस्य भजामि ताम्॥ **9** ॥

उरोगा निजनाथस्य सरोगा पद्मवाञ्छया।
सरोगानाश्रितानस्मान् अरोगान् वितनोतु सा॥ **10** ॥

वसुदा भक्तियुक्तानां वसुदेववधूवरा।
वसुमात्रपदग्राहिवसुधोपरि राजते॥ **11** ॥

असुभूता जगन्नेतुः कुसुमायुधशालिना।
ससुता भातु मच्चित्ते ससुरासुरसेविता॥ **12** ॥

कामिनी कैटभारातेः यामिनीनाथसोदरी।
स्वामिनी सर्वनारीणां भामिनी भातु चेतसि॥ **13** ॥

धारिणी सर्वलोकानां हारिणी चेतसो हरेः।
सारिणी जीवकृत्यानां वारिणी वर्धतेऽहसाम्॥ **14** ॥

वेदिनी वेदतत्त्वानां मेदिनी गुणसन्ततेः।
वादिनी प्रियवादानां भेदिनी दुर्विधेरियम्॥ **15** ॥

योषितामुत्तमां वन्दे घोषितां वेदसूक्तिभिः।
पोषितां निधिना वारां तोषितां देवराशिभिः॥ **16** ॥

मन्दिरायितपाथोजां वन्दिराजधनाधिपाम्।
चन्दिरानन्तरोदीतां इन्दिरामहमाश्रये॥ **17** ॥

सवनावनिसञ्जाता भवनाभरणं हरेः।
अवनाय ममेदानीं कवनान्तः प्रनृत्यतु॥ **18** ॥

बाला जनकराजस्य कालालिकुलकुन्तला।
सालाभभुजरामश्रीः जालानि द्यतु मेऽहसाम्॥ **19** ॥

तनुजा कलशाम्बोधेः अनुजाता कलानिधेः।
दनुजारिमनःकान्ता मनुजाधिपलालिता॥ 20॥

पारिजातलताऽस्माकं कारिजातनुता मुहुः।
पारिजातवनप्रीता साऽरिजातं व्यपोहतु॥ 21॥

करोपबृंहितश्रीमत्सरोरुहमनोहराम्।
नरो विभावयन्नन्तर्वरो भवति धीमताम्॥ 22॥

उरो विभूषयन्ती सा गुरोरखिलदेहिनाम्।
सुरोदितनुतिप्रीता करोतु सततं शुभम्॥ 23॥

उदितामममृताम्भोधेः मृदितां विष्णुवक्षसा।
गदितां वेदसन्तत्या हृदि तां कलये रमाम्॥ 24॥

इलावसनसञ्जातां कलानिधिसहोदरीम्।
बलानुजमनःकान्तां बलारिविनुतां भजे॥ 25॥

जनिता निधिना वारां वनिताकुलभूषणम्।
धनितां ददती स्वानां जनितापहराऽस्तु नः॥ 26॥

बलारिनुतपादाब्जा कलानिधिसहोदरी।
बलाय मम सा भातु बलानुजविकासिनी॥ 27॥

कथिता व्यासतातेन मथितामृतसिन्धुजा।
व्यथितामृतदा प्रीत्या प्रथिता राजते रमा॥ 28॥

वेदेन स्तौति मे ! त्वां यः खेदेन स विमुच्यते।
भेदेन च सुरेन्द्रेभ्यः स्वेदेन तु न मुच्यते॥ 29॥

पद्मे ! तवाङ्कसङ्गेन पद्मे पादाह्वये विभोः।
पद्मे चोरौ निषण्णाऽसि पद्मे शरणचिन्तनम्॥ 30॥

शङ्करार्चितपादाब्जां कङ्कराजद्रुतान्तराम्।
अङ्कराजत्प्रियाङ्घ्र्यब्जां शङ्कराङ्घ्र्यम्बुजां भजे॥ **31** ॥

शृङ्गाररससर्वस्वं भृङ्गारवयुताम्बुजाम्।
अङ्गारमुखसेव्याङ्घ्रिं रङ्गारामविहारिणीम्॥ **32** ॥

अलिना मलिनं मातः कमलं कुरुषेऽमलम्।
कलिना मलिनं तद्वद्धिमलं कुरु मामपि॥ **33** ॥

कलिनाऽऽकुलितं मातः! बलिना माऽमलङ्कुरु।
अलिनाऽऽकुलितं यद्वद् मलिनाकृतिमम्बुजम्॥ **34** ॥

धरणीतलजा जीयात् तरणीड्यकुलामृतम्।
वरणीयगुणैः पूर्णा ह्यरणीजविशुद्धिदा॥ **35** ॥

तरुणी ताटकारातेः करुणामयविग्रहा।
अरुणाम्बुजसावर्ण्या वरुणालयकन्यका॥ **36** ॥

मधुमित्रं वचो यस्याः मधुशत्रुरतं मनः।
मधुमत्पद्महस्ता सा मधुरा पातु मां रमा॥ **37** ॥

अधुना निर्वृतस्सोऽहं मधुरा विष्णुनान्विता।
विधुना सह सञ्जाता मधुना वचसा स्तुता॥ **38** ॥

समा न विद्यते यस्याः समासु वनितास्वपि।
समासात्ते हितं वच्मि समाश्रय मनो! रमाम्॥ **39** ॥

कुमारीं कलशाम्भोधेरुमानुतपदाम्बुजाम्।
सुमायुधस्य जननीं रमामाश्रय हे! मनः॥ **40** ॥

एषा मनीषिभिर्मान्या योषा वृषगिरीशितुः।
भाषागीतयशोराशिः दोषान् दूरीकरोतु नः॥ **41** ॥

भूरिलावण्यसम्पूर्णा भूरियं गुणसम्पदाम्।
वारिधेरुदयं याता वारिजातनिवासिनी ॥ **42** ॥

गजावनविधातुर्या भुजान्तरपरिश्रया।
अजादिसुरवन्द्यां तां भजाम्यालिभिरावृताम् ॥ **43** ॥

गजरक्षणदक्षस्य भुजमध्यनिवासिनीम्।
भज चित्त ! सखे ! भक्त्या सुजनं मामये ! कुरु ॥ **44** ॥

कलशाम्भोधितनयां कलमञ्जुलभाषिणीम्।
कलम्बसूनजननीं कलये कमलां हृदि ॥ **45** ॥

दयिते ! दनुजारातेः मयि ते महिता दया।
अयि ! तेनाऽपि सम्मान्या शयितेवास्तु सर्वदा ॥ **46** ॥

विना क्षणं नहि स्याद्या विना वियति यायिनम्।
विनायकनुता सा श्रीः विनाशयतु पाप्मनः ॥ **47** ॥

रजनीनाथभगिनी गजभीहरभामिनी।
भजतामिष्टदा लक्ष्मीः सजयाऽलङ्करोतु माम् ॥ **48** ॥

सुतनुस्सुन्दरांसस्य सुतबाणनिवासिनी।
वितनोतु विशालाक्षी विततिं मम सम्पदाम् ॥ **49** ॥

मातर्मङ्गलरूपां त्वां प्रातर्नित्यं स्मराम्यहम्।
नातस्त्रासः कुतोऽप्यस्ति व्रातस्तिष्ठतु मेऽंहसाम् ॥ **50** ॥

सदावलिपरित्रातुः मुदाऽबलतया स्थिता।
सदावलिमनोज्ञास्या सदाऽबलमवत्विमम् ॥ **51** ॥

मनोहरतमा जिष्णोः अनोकहलता रमा।
विनोदनकरी विष्णोः मनो विशतु मामकम् ॥ **52** ॥

दारान् श्रीदानवारातेः वारान्निधित उत्थितान्।
माराङ्गजनकान् भव्यसारान् वयमुपास्महे॥ 53॥

भवसन्तापतप्तेऽस्मिन् भवमुख्याभिवन्दिते !।
भवत्याः करुणादृष्टिः भवत्वयि ! सुधामयी॥ 54॥

पुरुषस्य पुराणस्य पुरन्ध्री पुरुलोचना।
पुरुहूतस्तुता पुण्या पुरतस्स्फुरतु स्वयम्॥ 55॥

सागरात्मभवा साध्वी सागरान्तश्शयप्रिया।
सा गजानतपादाऽस्तु सागसोऽपि मम श्रियै॥ 56॥

काममाता रमा पातु कामपालानुजाङ्गना।
काममानतसङ्घानां कामदा काऽपि देवता॥ 57॥

विषमास्त्रस्य जननी विषमाक्षपितामही।
विषसञ्जातमध्यस्था विषयाशां व्यपोहतु॥ 58॥

सागरादुदिता रागान्नागराजशयप्रिया।
नागराजावनप्रीता सागरात् पातु मां भवात्॥ 59॥

हरिणाङ्कधृता रामा हरिणाङ्कसहोदरी।
करिणा चाभिषिक्ताघपरिणामं व्यपोहतु॥ 60॥

सारथेर्ब्रह्मणो माता सारथेर्ब्रह्मणः प्रिया।
सा रथिश्रेष्ठहस्तस्था सारथीष्टं ददातु नः॥ 61॥

भारती वक्ति यं नित्या भारती यद्वधूरियम्।
भारतीव्रतया कुर्यात् भारतीशपितुर्लघुम्॥ 62॥

शिरोमणिं वरस्त्रीणामुरोमणिमरेर्मधोः।
सरोमणिजगां स्मृत्वा नरो मणिमुखास्पदम्॥ 63॥

चामीकरमयी पातु भूमीकृतकरग्रहा।
स्वामी नो मधुरश्श्रीमान् कामीति कमलासना॥ **64** ॥

उरसा वहते यां तु मुरवैरी सदा मुदा।
पुरवैरिनुता साऽव्यात् सुरभूरुहसोदरी॥ **65** ॥

सारङ्गनयना पातु सा रङ्गशयनाङ्गना।
पारङ्गतो हि शास्त्राणां सारं गामिति शंसति॥ **66** ॥

असमास्त्रस्य जननीमसमामखिलैर्गुणैः।
“अ” समामानता भक्ताः असमा एव ते मताः॥ **67** ॥

समो मयाऽनया युक्तः समो निखिलजन्तुषु।
समो मयाऽपि संयुक्तः समोदोऽस्ति सदा परः॥ **68** ॥

पयोधितनया रामा वयोनाथध्वजाङ्गना।
अयो मम महान् सा मां वयोधिकमिहावतु॥ **69** ॥

अध्वरेऽस्तु मुदे जाता मध्वरेरुरसि स्थिता।
स्वध्वरे प्रीतिसंयुक्ता मध्वलिश्रितपद्मगा॥ **70** ॥

सङ्ख्यातीतगुणां लक्ष्मीं सङ्ख्या भजतु मामिका।
सङ्ख्यावन्तो वदन्त्येनां सङ्ख्यातयशसं मुहुः॥ **71** ॥

श्रियं जलधिजां यामो वयं शरणमीश्वरीम्।
भियं भवभवां हन्तुमियं प्रभवति स्वयम्॥ **72** ॥

रमा भवतु मे भूत्यै क्षमादिगुणशेवधिः।
समानयति या सर्वं कमानसधृताऽनिशम्॥ **73** ॥

रामा भवतु मे नित्यं सा मानसनिवासिनी।
कामारिनुतपादाब्जा वामा दामोदरस्य या॥ **74** ॥

वासुदेवस्य वनिता भासुरा भूषणोत्तमैः।
आसुरात्मसुदूराव्यात् सा सुराधिपसेविता॥ **75**॥

सामोददेववृन्देड्या दामोदरविलासिनी।
कामोदयनिदानं सा सामोदवचसेऽस्तु मे॥ **76**॥

सदनं मङ्गलौघानां वदनं वनितामणेः।
मदनं प्रति मातुस्स्तात् मदनन्तसुखाय तत्॥ **77**॥

निशान्ततनुरम्यश्रीः निशाकरसहोदरी।
निशामयतु मां लक्ष्मीः विशालतमलोचना॥ **78**॥

भृशादृतनता माता विशालहृदया रमा।
दृशा करोतु मे रक्षां कृशाङ्गी कैटभद्विषः॥ **79**॥

महिला मधुरानेतुः निहितातिहिता नते।
सहिता सद्गुणैस्सर्वैरहितानि व्यपोहतु॥ **80**॥

जननी रतिनाथस्य जननीतिविधायिनी।
रजनीनाथभगिनी रजनीं द्यतु संसृतिम्॥ **81**॥

जाया श्रीजगतां नेतुः मायादूरपथस्थिता।
कायाधवनता भक्त्या पायादप्रियतोऽत्र माम्॥ **82**॥

ममतारहिते प्रीतां मम तां मातरं भजे।
ममतां मधुकालस्य नमतां मङ्गलप्रदाम्॥ **83**॥

भुजयोरन्तरा पत्युः गजयोरपि या स्थिता।
सजयो यां नमन् मर्त्यः भज योगेन तां श्रियम्॥ **84**॥

कानने प्रीतिमत्येषा काननेऽस्या वधूरपि।
मानने जनसङ्घेषु माऽऽननेऽस्तु तया सह॥ **85**॥

उरोजातस्स्पृहा भर्तुः सरोजातरता रमा।
नरो जातरतिस्तस्यां सरोजातासनाधिकः॥ **86** ॥

पङ्कजातरता लक्ष्मीः पङ्कजातं हरत्यसौ।
अङ्कजातरतिर्भर्तुरङ्कजातप्रथानुजा॥ **87** ॥

वाताङ्गजातविनुता माता भवतु मानसे।
गीता सकलसल्लोकैः सीता साऽमितवैभवा॥ **88** ॥

जन्मवज्जलधेर्वस्तु सन्मतिश्लाघिताङ्घ्रि यत्।
मन्मथेन सपुत्रं तन्मन्मनस्यस्ति सर्वदा॥ **89** ॥

कथितां निगमान्तौघैः प्रथितां गुणसम्पदा।
मथिताङ्घ्रिनमत्पापां पथि तां कुरु चक्षुषोः॥ **90** ॥

श्रुतिभिर्गदितां लक्ष्मीं स्मृतिभिश्च महात्मभिः।
नतिभिः पूजितामग्रे कृतिभिः परिपूजय॥ **91** ॥

लसन्ती लक्षणैस्सर्वैः वसन्ती पतिवक्षसि।
हसन्ती चालिभिस्सौतु रसं तीव्रभवे मयि॥ **92** ॥

उदन्तमात्मनः श्रुत्वा रुदन्तं पाप्मनः पुनः।
मदन्तमन्तकं चापि त्वदन्तिकरतं कुरु॥ **93** ॥

रतिनाथस्य जननीमतिसुन्दरविग्रहाम्।
प्रतिभा मम गृह्णातु प्रतिवासरमुद्यता॥ **94** ॥

आमोदपूर्णपद्मस्था दामोदरकृशोदरी।
आमोदभजनप्रीता सामोदं वितनोतु माम्॥ **95** ॥

हिरण्यजेतुरङ्कस्थां हिरण्मयविग्रहाम्।
हिरण्येति श्रुतावुक्तां हिरण्यमुखदां भजे॥ **96** ॥

शतकोटिभृता वन्द्यां शतकोटिधनप्रदाम्।
शतपत्रासनां नौमि शतपत्राक्षभामिनीम्॥ 97॥

कृतमन्युजनानन्द्यां गतमन्युजनप्रियाम्।
शतमन्युकृतस्तोत्रां शतमन्युजवो भजे॥ 98॥

शतपत्रासनासीनां शतपत्राक्षकामिनीम्।
शतपत्रायुधस्याऽम्बां शतपत्रप्रियां नुमः॥ 99॥

अनिलात्मजलाङ्गूलमनलाकुलमप्यलम्।
जलालयं त्वया लक्ष्मि ! लङ्कालङ्कारकालकम्॥ 100॥

मा सा मानससंविष्टा माता कालाब्दकामिनी।
मां प्रेरयतु धन्येषु मान्येषु शुभकर्मसु॥ 101॥

मत्तो मन्दो महापापी मनुजो न महीतले।
मदनाम्ब ! महाभागे ! मधुमर्दनमानिनि !॥ 102॥

कमले ! करुणापूर्णे ! कमलाकरवासिनि !।
कलिना कलुषात्मानं कटाक्षैरमलङ्कुरु॥ 103॥

खलानां प्रथमस्सोऽहं खपुष्पायितसद्गुणः।
खजातमस्य मे कुर्याः खगवाहप्रिये ! शुभम्॥ 104॥

गता हि बहवः कालाः गरेऽस्मिन् वसतो भवे।
गतिस्सती त्वदायत्ता गरुडध्वजकामिनि !॥ 105॥

घनीभूताघजातोऽहं घटे विषमये स्थितः।
घटते नास्य सत्तैव घनश्यामकुटुम्बिनि !॥ 106॥

चतुरा सा त्वमेवाम्ब ! चक्रपाणिं प्रचोदय।
चतुर्भुजस्स सद्यो मां चन्द्रसोदरि ! पास्यति॥ 107॥

जननी जगतामुक्ता जयेति गृणतो गिरा।
जलधेर्जननं प्राप्ता जाया जयतु सा हरेः ॥ **108** ॥

॥ इति प्रासश्रीशतकं समाप्तम् ॥